श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री वेदान्तरामानुजमहादेशिक स्तोत्रम् ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वेदान्तरामानुजमहादेशिक स्तोत्रम् ॥

श्रीमद्वेदान्तरामानुजमुनिकरुणालब्ध वेदान्तयुग्मं
श्रीमच्छ्रीवासयोगीश्वर गुरुपदयोरर्पितस्वात्मभारम्।
श्रीमच्छ्रीरङ्गनाथाह्वयमुनिकृपया प्राप्तमोक्षाश्रमं तं
श्रीमद्वेदान्तरामानुजमुनिमपरं संश्रये देशिकेन्द्रम्॥

अब्देऽस्मिन् विभवे विवस्वति गते मीनं छदे पाण्डरे
पञ्चम्यां मृगलक्ष्मणो मृगशिरोनक्षत्रयुक्ते दिने।
श्रीमच्छ्रीनिधियोगिवर्यकरुणासंप्राप्त सर्वार्थकः
श्रीमद्वेदवतंसलक्ष्मणमुनिः श्री रङ्गनाथं ययौ॥ १ ॥

विभवाब्दे झषे शुक्लपञ्चम्यां विधुवासरे।
वेदान्तलक्ष्मणमुनिः स्वाचार्यचरणावगात्॥ २ ॥

श्रीपतेः करुणा लोकदुःखनीहारभानुभा।
अव्याद्वेदशिरो रामानुजाख्य गुरुरूपिणी॥ ३ ॥

मतरक्षणदत्तमतिः यतिपतिसन्दिष्टमार्गपान्थाग्र्यः।
कुमतिगिरिकुलिशरूपो रक्षतु निगमान्तलक्ष्मणाख्यगुरुः॥ ४ ॥

ते गुणाः शीलवात्सल्यसाम्यादयः प्राप्य सर्वेश्वरं ये स्वसत्तां ययुः।
प्रापुरद्याश्रितास्तं गुरुं पूर्वतोप्युन्नतिं तेन संप्रेषितं भूतले॥ ५ ॥

वेदयुग्मविलसत्सुधीर्गुरुः ज्ञानशीलयुतवृत्त शेवधिः।
सम्प्रदायपरिरक्षणक्षमः शिष्यबृन्दमवसात्कृपानिधिः॥ ६ ॥

दानजितकामधेनुः कारुण्यसुधाकलानिधिर्भौमः।
जयति गुरुरस्मदीयो जैत्ररथो यतिराजराजवीथ्याम्॥ ७ ॥

तमोगुणविमोहितं कलितपापजातं सदा
कदध्वगमसारवाङ्मनसपङ्किलं सङ्कुलम्।
विकत्थन विदूषितं विबुधगर्हितं मानवं
रिरक्षिपति कः पुमानखिलदादृते देशिकात्॥ ८ ॥

राजीवो वेदयुग्मावनकृतधिषणः कूर्मरूपः श्रितानां
कोलो वेदार्थमुस्तानिचयनिगलने वादिसङ्घे नृसिंहः।
क्रान्त्वा लोकं स्वकीर्त्या परशुधरमुनिः दम्भराजन्यहन्ता
तालाङ्कोऽज्ञानधाराविदलनविषये राजतेऽसौ गुरुर्नः॥ ९ ॥

मासखोपि धृततापसवेष राम एष निगमान्तविवेके।
कृष्णतामुपगतः कलिहन्ता ह्येक एव सकलार्थकरोऽभूत्॥ १० ॥

नुतः पण्डितलोकेन वृतः शिष्यगणैस्सदा।
श्रितो मोक्षार्थिभिस्सद्भिः स्थितस्सर्वनृणां हृदि॥ ११ ॥

जनिमतामवनाय चकार यज्ञनिशते कृपया मधुनाशनः।
सकलमेकपदे कृतवानसौ निगमशेखरलक्ष्मणयोगिराट्॥ १२ ॥

मज्जन्तं शिशुमस्मदादिकमभीक्ष्याज्ञानरोगाप्लुतं
स्नेहाद्रक्षितुमञ्जसात्र गुरुणा मातृत्वमासादितम्।
भ्रान्ति ध्वान्त विदारणाय महता मार्ताण्डतासादिता
मायावादिविदारणे कृतमहो शार्दूलविक्रीडितम्॥ १३ ॥

हा हन्तेति न वक्तव्यं गुरूणां विरहार्दितैः।
तत्कृपासारनिर्धूतकल्मषैर्नाकजेतृभिः॥ १४ ॥

देव त्वत्पादपङ्केरुहधृतमतयः सन्ति केचिद्वरेण्याः
किं तैः त्वद्दत्तभाग्भिः विपुलमसुलभं त्वां विचिन्वद्भिरार्यैः।
त्वद्दास्यं त्वद्विभूतिं निरवधिकतयास्माकमापादयद्भिः
श्रीमद्वेदान्त रामानुजमुनिवचनैरेव दत्ताभयाः स्मः॥ १५ ॥

शितं शरं मर्मणि सम्प्रयुज्य भोः विकत्थसे काल वृथा जहीहि तत्।
यदस्मदीया गुरवः सुधामयैः वचोभिरस्मद्धृदयेषु शेरते॥ १६॥

का त्वं माये कुत्र धाम त्वदीयं नागन्तव्यं मत्सकाशं भवत्या।
अद्य स्वान्ते नः स्वदन्ते गुरूणां वाचो हृद्या वेदसारानुलिप्ताः॥ १७॥

यति क्ष्माभृदक्षतं स्वमार्गमत्र रक्षितुम्।
समैधताद्य वेदमौळि राघवानुजात्मना॥ १८॥

नमस्तस्मै लीलाविजितविमतभ्रान्त मनसे
    कलिक्षोभप्रोद्यत्तिमिरनिकराकाशमणये।
श्रिताशेषाघौघप्रशमनसमुद्यत्स्मितजुषे
    सुसम्पत्सन्धात्रे यतिनृपतिरूपाय गुरवे॥ १९॥

महते करुणार्द्राय महावैभवशालिने।
श्रुत्यन्त लक्ष्मणाख्याय गुरवेऽस्तु नमो नमः॥ २०॥

॥ इति श्री वेदान्तरामानुजमहादेशिक स्तोत्रं सम्पूर्णम्॥